# Contents


1 mAmava raghuvIra 2

2 kothanDarAmam 3

3 santAna rAMasvAMinam 4

4 shrI rAmam ravikulAbdhisomam 5

5 kShitijAramaNam 6

## श्री मुत्तुस्वामि दीक्षित विरचित

## राम कीर्तनानि

**1 mAmava raghuvIra**

श्री मुत्तुस्वामि दीक्षित विरचित

# मामव रघुवीर

रागम्: माहुरि    ताळम्: मिश्र चापु

**पल्लवि**

मामव रघुवीर मर्त्यावतार माधव धीर

**अनुपल्लवि**

त्वामाहुरीशादयस्तत्वमिति करुणानिधे दीनम्

**चरणम्**

मामकहृदयनिवास श्रीनिवास मारुतिप्रभृतिदासविश्वास

भूमिजासहवास इहपरभुक्तिमुक्तिवितरणविलास

कामजनक कनकाम्बरधर तामरसाक्षवदनपदकर
पामरपण्डितपावनकरनामधेय गुरुगुहनुत वर

◇ ◇ ◇ ◇ ◇◇ ◇ ◇ ◇ ◇

## 2 kothanDarAmam

### श्री मुत्तुस्वामि दीक्षित विरचित

# कोदण्डरामम्

रागम्: कोकिलारवम्    ताळम्: आदि

### पल्लवि

कोदण्डराममनिशं भजामि कोकिलारवजानकीरमणम्

### tसमष्टिचरणम्

पादजपांसुपालिताहल्यं परमेश्वरगुरुगुहवात्सल्यं
वेदान्तवेद्यमतिकौशल्यं विश्वामित्रहितमकौटिल्यम्

◇ ◇ ◇ ◇ ◇◇ ◇ ◇ ◇ ◇

## 3 santAna rAMasvAMinam

### श्री मुत्तुस्वामि दीक्षित विरचित

# सन्तानरामस्वामिनम्

रागम्: हिन्दोलवसन्तम्     ताळम्: आदि

### पल्लवि

सन्तानरामस्वामिनं सगुणनिर्गुणरूपं भज रे

### अनुपल्लवि

सन्ततं यमुनाम्बापुरिनिवसन्तं

नतसन्तं हिन्दोलवसन्तमाधवं जानकीधवं
सच्चिदानन्दवैभवं शिवम्

### चरणम्

सन्तानसौभाग्यवितरणं साधुजनहृदयसरसिजचरणं

चिन्तामण्यालङ्कृतगात्रं चिन्मात्रं सूर्यचन्द्रनेत्रं
अन्तरङ्गगुरुगुहसंवेद्यं अनृतजडदुःखरहितमनाद्यम्

◇ ◇ ◇ ◇ ◇◇ ◇ ◇ ◇ ◇

# 4 shrI rAmam ravikulAbdhisomam

श्री मुत्तुस्वामि दीक्षित विरचित

## श्रीरामं रविकुलाब्धिसोमम्

रागम्: नारायणगौळ     ताळम्: आदि

### पल्लवि

श्रीरामं रविकुलाब्धिसोमं श्रितकल्पभूरुहं भजेऽहम्

### अनुपल्लवि

धीराग्रगण्यं वरेण्यं दीनजनाधारं रघुवीरं
नारदादिसन्नुतरामायणपारायणमुदितनारायणम्

### चरणम्

दशरथात्मजं लक्ष्मणाग्रजं दानवकुलभीकरं श्रीकरं

कुशलवतातं सीतोपेतं कुवलयनयनं सुदर्भशयनम्

सुशरचापपाणिं सुधीमणिं सूनृतभाषं गुरुगुहतोषं
दशवदनभञ्जनं निरञ्जनं दाननिधिं दयारसजलनिधिम्

◇ ◇ ◇ ◇ ◇◇ ◇ ◇ ◇ ◇

## 5 kShitijAramaNam

# श्री मुत्तुस्वामि दीक्षित विरचित

# क्षितिजारमणम्

रागम्: देवगान्धारि     ताळम्: आदि

### पल्लवि

क्षितिजारमणं चिन्तये श्रीरामं भवतरणम्

### अनुपल्लवि

क्षितिपतिनतचरणं सेवितविभीषणं
क्षितिभरणं श्रितचिन्तामणिमघहरणम्

### चरणम्

सकलसुरमहितसरसिजपदयुगळं शान्तं अतिकुशलं

विकसितवदनकमलमतुलितममलं वीरनुतभुजबलम्

शुकसनकमुनिमुदितगुरुगुहविदितं शोभनगुणसहितं
प्रकटितसरोजनयनं पालितभक्तं भवपाशहरणनिपुणम्

◇ ◇ ◇ ◇ ◇◇ ◇ ◇ ◇ ◇